Gyanshauryam, International Scientific Refereed Research Journal
© 2022 GISRRJ | Volume 5 | Issue 5 | ISSN : 2582-0095

# उपनिषत्संवर्णितशिक्षणपद्धतय:

डॉ. आर् एल् नारायणसिंह:
सहाचार्य:, शिक्षाशास्त्रविभाग:,केन्द्रीयसंस्कृतविश्वविद्यालय:, भोपालम्।
राय शिवरामकृष्णसिंह:
सहायकाचार्य:, शिक्षाशास्त्रविभाग:, केन्द्रीयसंस्कृतविश्वविद्यालय:,एकलव्यपरिसर:, अगरतला।

**Article Info**
Volume 5, Issue 5
Page Number : 18-25

**Publication Issue :**
September-October-2022

**Article History**
Accepted : 03 Sep 2022
Published : 10 Sep 2022

**शोधसारांश:** – उपनिषद्स्तु निर्विवादरूपेण प्राचीनतमं साहित्यम् इति मन्यत एव । यतोहि प्रत्येकं कार्यस्य यत्किमप्युद्देश्यं नूनमेव भवति द्देश्यमनुदिश्य न मन्दोऽपि प्रवर्तते इत्याभणकमपि सर्वथा प्रचलितं वर्तते विद्वत्सु । विश्वस्य प्राचीनतमासु सभ्यतासु वर्तते अन्यतमा भारतदेशस्य सभ्यता ।अत्र शिक्षा एव हेतु: । अत्रत्या शिक्षणपरम्परापि प्राचीनतमा वर्तते । प्राचीने भारते शिक्षा सर्वव्याप्ता आसीत् । उपनिषत्कालिकाया: शिक्षाया: पद्धति: मोक्षप्रदायिका आसीत् । उक्तमपि- **यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । आनन्दो ब्राम्हणो विद्वान् न विभेति कदाचन।।**[1]

**मुख्यपदानि-** उपनिषद, शिक्षणपद्धति, शिक्षार्थी ।

उपनिषच्छब्दोऽम् 'उप' 'नि' इत्युपसर्गद्वयपूर्वकात् 'षदॢ विशरणगत्यवसादनेषु' इत्यस्मात् धातो: निष्पन्न: अनादिकालीनात्माज्ञानं नितान्तं शिथिलीकरोतीत्यर्थं सूचति। अथवा उप-ब्राह्मण: सामीप्यं निस्संशयं जीवं साधयतीति अपरमप्यर्थं सूचयति। उभाभ्यामेताभ्यां जीवब्रह्मणो: ऐक्यरूपविषये अज्ञानं तन्मूलकभ्रमञ्च दूरीकृत्य जीवब्रह्मैक्यसाधकज्ञानदा उपनिषत् इति भावं जयनति। उपजातमनादिकालात्- प्रवृत्तमात्मसंसारसम्बन्धं नितरां सादयति अवसादयति वा या सा उपनिषत् इत्यप्यर्थ: जायते। उपरि दृष्टार्थानां सार: उपनिषच्छब्दस्यार्थ: ब्रह्मविद्या इति फलति। एषा कार्यत्रयसम्पादिका।

1. संसारसारतामति सादयति (शिथिलीकरोति)
2. अज्ञानं सादयति। (उन्मूलयति)
3. प्रत्यगात्मानं साधयति (गमयति)

मुख्यत: उपनिषच्छब्दोऽयं ब्रह्मविद्यावाचक:, किन्तु गौणवृत्त्या तत्प्रतिपादकप्रमाणभूतग्रन्थान् सूचयति। उपनिषद: वेदानां गुह्यभागा:, यत्र आत्मन: स्वरूपं निगूढमस्ति। अनेन उपनिष्छब्दस्य मुख्यविद्या रहस्यविद्येति वा अर्थे भवति।

शङ्कराचार्यमहाभागै: तैत्तिरीयोपनिषद्भाष्ये 'पुरुषस्य गर्भजन्मजरादीनां नाशनं' (उच्छेद:) अथवा अवसादनं कुर्वन्तीति कारणेन उपनिषच्छब्दस्य 'विद्या' इति प्रयोग: कृत:। अर्थात् ब्रह्मण: समीपं नयतीति अथवा एतासु परब्रह्म

[1] –छान्दोग्योपनिषदि 2.4.1

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

उपतिष्ठति इत्यत एषा विद्येति कथ्यते। तत्प्रतिपादकग्रन्थस्यापि उपनिषदित्येवं संज्ञा। उपनिषद् विद्येति उच्यते, तच्छीलिनां गर्भजन्मजरादिनिशातनात्तदवसादनाद्वा ब्रह्मणो वोपनिगमयितृत्वाद् वास्यां परं श्रेय इति। तदर्थत्वाद् ग्रन्थोऽप्युपनिषत्।

कठोपनिषद्व्याख्याने शङ्करभगवत्पादैः एवम्प्रतिपादितम्- उपनिषदां प्रतिपाद्यं जिज्ञासितं च वस्तु ब्रह्म भवति। ब्रह्मसम्बद्धायाः विद्यायाः नाम उपनिषत्। अथवा ब्रह्मविद्या मुमुक्षूणां ब्रह्मप्राप्तिं कारयति। अतः ब्रह्मविद्यैवोपनिषत्। अयं प्रयोगः यथा घृतमायुर्वर्धयतीत्यतः आयुष्कारकं घृतम् आयुर्घृतमिति प्रयुज्यते तथैव उपनिषत् ब्रह्मविद्या इति प्रयोगः।

उपनिषच्छब्देन च व्याचिख्यासितग्रन्थप्रतिपाद्येद्यवस्तुविषयः विद्योच्यते, ग्रन्थस्यापि तादर्थ्येन तच्छब्दत्वोपपत्तेः 'आयुर्वै घृतम्' इत्यादिवत् (कठोपनिषद्)।

पाश्चात्यपण्डितः 'ओल्डन् बर्ग्' उपनिषच्छब्दार्थम् उपासनां मत्वा पूजां करोति। Max Muller महाशयः शिष्यानां गुप्तत्त्वसम्बद्धा चेति रचनेति आशयं प्रकटयति। बाल्डायसन्महाशयः शब्दस्यास्य अर्थत्रयं प्रतिपादयति- गुप्तशब्दः, गुप्तमूलग्रन्थः, गुप्ताशयः इति। अतः विभिन्नानां विदुषां मतेषु शब्दस्य अस्य विभिन्नार्थाः दृश्यन्ते। सारभूतार्थस्तु उपनिषद् ब्रह्मविद्या एवं तत्प्रतिपादकग्रन्थश्च।

अस्यां साधनसाध्यसाधकप्रतिपाविषयादीनां व्याख्यानं दृश्यते । अस्याः उपनिषदः मन्त्राणामाधारेणैव लोकेऽस्मिन् सांख्यसगुणनिर्गुणद्वैताद्वैताद्यनेकमतानां प्रकाशनं जातम्।

अस्याः उपनिषदः प्रारम्भः जगत्कारणमीमांसैव । कतिपयब्रह्मवादिनः जगतः कारणं किं? वयं कुतः उत्पन्नाः? कथं वयं जीवनं धारयामः ? अस्माकं आधारः कः ? कस्य प्रेरणया कथं सुखदुःखादीनामनुभवं प्राप्नुमः इत्यादिविषयाणां पारस्परिकं विचारं कुर्वन्ति।

तदनन्तरं महर्षयः कालस्वभावनियतिदृच्छाभूतपुरुषादिविभिन्नकारणानि विचारयन्ति।

तदनन्तरं ब्रह्मवेत्तारः प्रमाणान्तरैः ज्ञातुमशक्ये मूलतत्त्वविषये इतरोपायान् नैव दृष्ट्वा ध्यानयोगाश्रयणेन स्वीयगुणैः आच्छादितपरमात्मनः शक्तिं साक्षात् चक्रुः।

अनया रीत्या प्रथमाध्याये जगतः कारणस्य निर्णयो जातः ।

**उपनिषत्संवर्णितशिक्षणपद्धतयः**

**संवादविधिः**

ब्रह्मविद्यैव मूलं उपनिषच्छिक्षायाः। वाङ्मयेऽस्मिन् परममुख्यानि तत्त्वानि निहितानि सन्ति। ऋषीणाम् आदेशाः मुख्या एव। मनोनेत्रेण दर्शनं, दृष्टस्य वर्णनमिति शक्तिद्वयसम्पन्नाः ऋषयः स्वीयाः अनुभूतीः विद्वत्सङ्गोष्ठीषु संवादरूपमाध्यमेन मुमुक्षून् स्वीयशिष्यान् बोधयन्ति स्म । संवादपद्धतिः उपनिषद्वाङ्ये अतिविशिष्टा पद्धतिरासीत्। यतोऽहि समग्रमपि उपनिषद्विषयकज्ञानं एतत्पद्धतिद्वारैव उपलभ्यते। "तात्विकचिन्तनपरकाणां संवादगोष्ठीनां वेदवाङ्मयमेव प्रधानमस्ति। संवादोऽयं बहुविधः। गुरु-शिष्याणां मध्ये एवं मनुष्याणां तद्भिन्नप्राणिनां मध्येऽपि संवादोऽयं परिलक्ष्यते । एवमेव पितृपुत्रयोः भिन्नभिन्नर्षीणां मध्येऽपि सवादः प्रचलति स्म। तथैव विभिन्नः संवादः विभिन्नशिष्याणां मध्येऽपि आसीदिति ज्ञायते।
उदाहरणार्थं -

1. पिता-पुत्र संवादः।
    1. उद्दालक-आरुणि-श्वेतकेतुमध्ये संवादः
    2. महर्षिवारुणि-भृगुमध्ये संवादः।
2. पति-पत्न्योर्मध्ये संवादः
    1. महर्षियाज्ञवल्क्यमैत्रेयीसंवादः

3. शिष्यमानवेतरप्राणिनां मध्ये संवादः

1. सत्यकामजाबालवृषभयोर्मध्ये संवादः
2. सत्यकामजाबाल–हंसयोर्मध्ये संवादः

4. देवर्षिऋषिसंवादः

1. देवर्षिनारदऋषिसनत्कुमारयोर्मध्ये संवादादयः ।

एवं प्रकारेण समस्तोपनिषद्वाङ्मये संवादरूपा इयं पद्धतिः दृश्यते।

संवादपद्धतौ विभिन्नानां मध्ये वादविवादः प्रचलति, तत्सन्दर्भे निगूढाः नूतनाश्च विषयाः बहिर्भूताः भवन्ति । वस्तुतः विधिरयं अस्य वाङ्मयस्य अत्यनुकूलः उत्तमश्च ।

**प्रश्नोत्तरविधिः** - अपरः विधिः प्रश्नोत्तरविधिरपि वाङ्मयेऽस्मिन् बहुत्र उपयुक्तो दृश्यते। विद्वत्सम्मेलनेषु जिज्ञासवः शिष्याः सन्दिग्धस्थलेषु प्रश्नान् पृष्ट्वा महर्षिभ्यः समाधानानि प्राप्य दूरीकृतसन्देहाः ज्ञानिनः भवन्ति स्म । एवमेव अध्यापनावसरे गुरवः स्वाध्यापनकार्य सम्पूर्य शिष्यान् प्रश्नान् प्रष्टुम् अध्यापितविषये संप्रेर्य तेषां सन्देहादिकं युक्तियुक्तसमाधानादिद्वारा दूरीकुर्वन्ति स्म। अध्यापनान्ते प्रश्नकरणमेकमनिवार्यं कार्यमासीत्। अधिकाधिकप्रश्नान् ये पृच्छन्ति, ते उत्तमशिष्याः इति गणना आसीत्। अध्यापनसमयापेक्षया प्रश्नकरणस्यैव अधिकः समयः दीयते स्म। जिज्ञासुरेव प्रश्नं पृच्छतीति भावनां शिष्येषु उत्पाद्य तान् अध्यापनकर्मणि प्रेरयन्ति स्म। अतः प्रश्नोत्तरविधिरपि प्रधानः आसीत् तस्मिन् युगे।

एवमेव अन्याः काश्चन पद्धतयः अपि परिलक्ष्यन्ते।

दृष्टान्तपद्धतिः अथवा सादृश्यपद्धतिः (Analogical Method)
कथापद्धतिः
एकाक्षरपद्धतिः
रूपकपद्धतिः
आत्मोक्तिपद्धतिः अथवा स्वगतभाषणपद्धतिः (Monological Method)
समन्वयपद्धतिः
व्युत्पत्तिपद्धतिः
सूत्रपद्धतिः इत्यादयः।

एतासां पद्धतीनां विवरणं किञ्चित् प्रस्तूयते ।

**दृष्टान्तपद्धति** : इयमेव पद्धतिः सादृश्यपद्धतिरित्यपि व्यवह्रियते।
(Analogical Method)

शिष्यान् निगूढतात्विकांशान् ज्ञापयितुं संवादेषु इतराः पद्धतीः अपि उपयुञ्जते स्म । तासु इयं दृष्टान्तपद्धतिरपि। कोऽपि सन्दिग्धांशः दृष्टान्तद्वारा स्पष्टो भवति। अमुम् अंश मनसि निधाय कठिनस्थलेषु गूढांशव्याख्यानावसरे बहून् दृष्टान्तान् दर्शयित्वा सन्देहदूरीकरणं साधयन्ति स्म। उदाहरणार्थं महर्षिरारुणिः आत्मपरात्मनोर्मध्ये अभेदनिरूपणार्थं मधुमक्षिकाणां दृष्टान्ते उपयुङ्क्ते स्म। यथा मधुमक्षिकाः भिन्नभिन्नपुष्पेभ्यः रसं संगृह्य एकरसत्वेन यथा परिणमयन्ति, तथैवात्रापि अनेके आत्मानः परमात्मा एक एव इति निरूपयन् आसीत्। एवमेव नदीनां सागरो गतिः इति न्यायात् सर्वाः अपि नद्यः विभिन्नाः एवमेव सागरं यथा प्रविशन्ति, तथैव विभिन्नाः आत्मानः एकमेव परमात्मानमाश्रयन्ते इति निरूपयितुं नदीसागरदृष्टान्तं सूचयन्नासीत्। महर्षिः याज्ञवल्क्यः आत्मनः अनुभूतिसम्पादनार्थं दुन्दुभिशङ्खवीणादीन् दृष्टान्तरूपेण ददाति स्म। अतः सूक्ष्मतत्त्वानां व्याख्यानावसरे ऋषिभिः संवादेषु दृष्टान्तपद्धतिः प्रयुज्यते स्म।

याज्ञवल्क्यः मैत्रेय्यै दुन्दुभेः शङ्कस्य वीणायाश्च सादृश्येन ('ज्ञातात् अज्ञातं प्रति' शिक्षणसूत्रम् अत्रान्तर्भवति) अद्वैतात्मविज्ञानमुपदिदेश । (बृ.उ. 2-4-1, 14)

**रूपकपद्धतिः** - ऋषिभिः रहस्यात्मकं गूढतत्त्वम् उपदेष्टुं पद्धतिमेनां उपयुक्तवन्तः। माण्डूक्योपनिषदि 'द्वा सुपर्णा' इत्यादिना जीवात्मपरमात्मानौ पक्षिद्वयरूपेण निरूप्य तयोः जीवात्मरूपी पक्षी सर्वानपि भोगान् अनुभुङ्क्ते, अन्यस्तु साक्षिरूपेण एनं पश्यतीति सुष्ठु अनयैव पद्धत्या निरूपितमस्ति। श्वेताश्वरोपनिषद्यपि एषैव रूपकपद्धतिः पुनः प्रयुक्ताऽस्ति।

कठोपनिषदि आचार्यः एव शरीरं रथं वक्ति। आत्मा अस्य रथस्य अधिकारी येन वियुक्तं रथं निश्चेष्टितं भवति। एवं बुद्धिः सारथिः, मनः प्रग्रहः, इन्द्रियाण्यश्वाः इति च सांसारिकभोगानुभवः एव एतेषामिन्द्रियरूपाणामश्वानां गम्यस्थानम्।

श्वेताश्वतरोपनिषदि ब्रह्मणः चक्ररूपकरूपेण निरूपणमस्ति। ब्रह्मचक्रस्य नेमिः भवति। चक्रमेतत् उत्पत्तिस्थितिप्रलयरूपे मार्गत्रये भ्रमति। एवं शुभाशुभविषये निमित्तद्वये चक्रमेतत् चलति। किन्तु याथार्थ्ये चक्रस्यास्य निरन्तरचलनस्य कारणं तु मोह एव।

चक्ररूपकेण रूपितमिदं ब्रह्म नदीरूपकेणापि वर्णितं दृश्यते उपनिषत्सु। संसारोऽयं निरन्तरं प्रवहन्नदीरूपेण वर्णितः। पञ्चप्राणाः अस्याः वीचिकाः भवन्ति। अन्तःकरणम् उद्गमः उत्पत्तिस्थितिविकृतिक्षयनाशादिभिः उत्पन्नानि त्रिविधात्मकानि दुःखानि अस्याः प्रवाहरूपेण वर्णितानि। अनेन प्रकारेण अनेकानेकरूपकाणां प्रयोगद्वारा ऋषयः नीरसां दर्शनमीमांसां सरसं कृतवन्तः।

**समन्वयपद्धतिः** - परिषत्सु बहुभिः ऋषिभिः कृतान् प्रस्तावान् कदाचित् तदन्यतमः अविरोधेन समन्वीय सिद्धान्तयति। यथा छान्दोग्ये सृष्टिविषये विवदमानानां षण्णां प्रस्तावानां समन्वयपुरस्सरं कैकेयः अश्वपतिः सिद्धान्तयामास । एवं प्रश्नोपनिषदि षण्णां ऋषीणां मतानां समन्वयं कृत्वा पिप्पलादः सिद्धान्तमाविश्चकार।

**परोक्षपद्धतिः**- परोक्षपद्धतिः अथवा परोक्षोपदेशपद्धतिः उपनिषत्सु संदृश्यते एव। कोऽपि विषयः साक्षात् कथनं विना परोक्षरूपेण उपदिश्यते। विधेरस्य अयमेव मुख्यार्थः। सङ्केतात्मकचशब्देन उपदेशो भवत्यत्र। उदाहरणार्थं सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत। अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत ॥

त्रिपादमृतस्य ब्रह्मणोऽनन्तगुणवतोऽनन्तशक्तेरनेकभेदोपास्यस्य विशिष्ट-शक्तिमत्वेनोपासनं विधित्सन्नाह - सर्वं सम्मतं, खल्विति वाक्यालङ्कारार्थो निपातः। इदं जगन्नामरूपविकृतं प्रत्यक्षादिविषयं ब्रह्मकारणं वृद्धतमत्वाद् ब्रह्म। कथं सर्वस्य ब्रह्मत्वमित्यत आह-तज्जलानिति तस्माद्ब्रह्मणो जातं तेजोबन्नादिक्रमेण सर्वम्। अतस्तज्जम्। तथा तेनैव जननक्रमेण पतिलोमतया तस्मिन्नेव ब्रह्मणि लीयत तदात्मतया श्लिष्यत इति तल्लम् । तथा तस्मिन्नेव स्थितिकालेऽनिति प्राणिति चेष्टत इति । य एवं ब्रह्मात्मतया त्रिषु कालेष्वविशिष्टं तद्व्यतिरेकेणाग्रहणात् । अतस्तदेवेदं जगत् । यस्माच्च सर्वमिदं ब्रह्म, अतः शान्तो रागदेवषादिदोषरहितः संयतः सन्यत्तत्सर्वं ब्रह्म तद्वक्ष्यमाणैर्गुणैरूपासीत्। "सर्वं खल्विदं ब्रह्म तज्जलानिति शान्तोपासीत्'। इत्यस्मिन् वावये ब्रह्मणः लक्षणं सङ्केतरूपेण शब्देन संसूचितमस्ति छा.उ.[3]-15॥

परमात्मनः संसारमयः शरीरं चक्ररूपेण प्रतिपाद्यते।

**तमेकनेमिं त्रिवृत्तं षोडशान्तं शाताार्धारं विंशतिप्रत्यराभिः।**

**अष्टकैः षड्भिर्विश्वरूपैकपाशं त्रिमार्गभेदं द्विनिमित्तैकमोहम् ॥**

परमात्मनः संसारमयः शरीरं नदीरूपेण।

**पञ्चस्रोतोम्बुं पञ्चयोन्युग्रवक्रां पञ्चप्राणोर्मि पञ्चबुद्ध्यादिमूल्यम्**

**पञ्चावर्तां पञ्चदु:खौघवेगां पञ्चादशभेदो पञ्चपर्वामधीम:।**

अत्र उभयो: मन्त्रयो: चलच्चक्रेण प्रवहन्नद्या च क्रमश: जगदिदं वर्णितमस्ति। केचनांशा: साक्षात्कथनापेक्षया परोक्षरूपेण कथनेन सुष्टु अवगम्यन्त इति विधेरुपयोग:। स्पष्टतया अवगमनं तु केवलं गुरुमुखेनैव भवति। आध्यात्मिकचिन्तनावसरेषु विधेरस्य प्राचुर्यं परिशील्यते।

**व्युत्पत्तिपद्धति:** - कुत्रापि कस्यापि शब्दस्य अर्थविषये सन्देहो जायते, तदा तस्य शब्दस्य व्युत्पत्ति: परिशीलनीया इति आचार्याणां मतम्। उपनिषत्सु बहव: शब्दा: सन्दिग्धा: भवन्ति । तेषां व्युत्पत्त्या एव सन्देहदूरीकरणं सम्भवति। उदाहरणार्थं स्वपिति, पिपासति इत्यादय: शब्दा:। लौकिकार्थे तेषां शब्दानां यद्यपि अवगतिर्जायते, तथाऽपि उपनिषद्विषय: अर्थ: गम्यो भवति। अर्थात् "यत्र यत्र पुरुष: 'स्वपिति' नाम तदा सौम्यसम्पन्नो भवति। तस्मादेनं स्वपिति इत्याचक्षते"

"यत्रैतत्पुरुष: पिपासति, तेज एव तत्पीतं नयते' अत्र वाक्ययो: स्वपिति क्रियापदस्य 'स्वे' सत्पदार्थे अपीतो भवति लयं गच्छतीति इत्यनेन सुषुप्तौ आत्मन: सत्पदार्थे लय: उपदिश्यते। तथैव बुभुक्षार्थितस्य अशनया इति पदस्य विभागद्वयं दर्शयित्वा अशितं जग्धं नयन्ति इति व्युत्पत्त्या आप: अशनाय शब्दवाच्य: इत्युपदिश्यते। एवं पिपासापदस्य पीतं जलं नयति सोषयति इत्यर्थाङ्गीकरणेन पिपासा शब्दस्य एक एवार्थ: इति व्युत्पत्त्या ज्ञायते।

**तात्कालिकसमाधानपद्धति:** (Adhoc Method) - विधावस्मिन् शिष्यस्य धारणाशक्ति: मुख्या । कस्याऽपि प्रश्नस्य शिष्येण दत्तं तात्कालिकं समाधानमाधृत्य विधिरयं प्रचलति। कस्याऽपि प्रश्नस्य समग्रं समाधानं नैव दीयते। उदाहरणार्थं वरुणवारुणयो: कथा स्मर्तुं शक्यते। वारुणे: धारणाशक्तिं परिशील्य तात्कालिकसमाधानविधानेन ब्रह्मज्ञानं क्रमेणोपदिश्य अन्ते ब्रह्मतत्त्वम् उपदिशति गुरु: । अस्मिन्विधौ उपदिश्यमानविषयस्य जटिलतां नानुभवति शिष्य इति अत्र वैशिष्ट्यम्।

**वाकोवाक्यविधि:** (Regressive Method)- अयमपि विधि: प्रत्यावर्तनपद्धतिरिति व्यवह्रियते कैश्चित्। अन्यै: प्रतिगमनपद्धतिरिति नाम्नाऽपि व्यवहृता दृश्यते। विधेरस्य स्वरूपं एवं भवति ।

संवादेषु प्रश्न: एक: पृच्छति, तस्यै कं समाधानं प्राप्यते । तदुत्तरमाधारीकृत्य पुन: प्रश्न: क्रियते। एवंरीत्या अन्तिमं स्पष्टं च ज्ञानं यावत् प्राप्यते, तावत् इयं परम्परा प्रचलत्येव। संपूर्ण ज्ञानम् अन्तिमोत्तरेण भवति। तत: पश्चात् प्रश्न: न भवति । उदाहरणार्थं बृहदारण्यकोपनिषदि जनकयाज्ञवल्क्यसंवाद:, गार्गियाज्ञवल्क्यसंवाद: इत्यादय: । एवं अन्यास्वपि उपनिषत्सु बहून्युदाहरणानि उपलभ्यन्ते

"अथ हैनं गार्गी वाचक्नवी प्रपच्छ, याज्ञवल्क्येति होवाच । यदि सर्वमप्स्वोतं च प्रोतं च, कस्मिन्न खल्वाप ओताश्च प्रोताश्चेति वायौ गार्गीति।... कस्मिन् खलु ओताश्च प्रोताश्चेति, स होवाच गार्गी। मातिप्राक्षी: मा ते मूर्धा व्यप्तवत्। अनतिप्रश्न्यां वै देवतामतिपृच्छसि गार्गीमातिप्राक्षीरिति। ततो हि गार्गि वाचक्नव्युपरराम।"

**सूत्रपद्धति:** (Aphoristic Method)- अतिगुह्यम् उपनिषद्वाङ्मयं बोधगम्यं कर्तुम् ऋषय: सूत्रपद्धतिमपि उपयुक्तवन्त:। अनया पद्धत्या ते महर्षय: समस्तमपि विचारतत्त्वं एकस्मिन् भावपूर्ण वाक्ये अभिव्यक्तीकुर्वन्ति स्म। 'तत्त्वमसि' 'अहं ब्रह्मास्मि' 'सर्वं खल्विदं ब्रह्म' इत्यादिभि: सूत्रवाक्यै: अतिविस्तृतं विचारं प्रवर्त्तितवन्त:। माण्डूक्योपनिषदि 'ओं' इत्यक्षरमेव ब्रह्मणि समस्तमपि विश्वम् अस्यैवाक्षरस्य व्याख्यानभूतमिति च उक्तमस्ति । अस्मिन् कालत्रयेण साकं कालातीतमपि सर्वं सन्निहितमस्तीति निरूपितम् । सम्पूर्णमेतत् ब्रह्माण्डं ब्रह्म एवम् आत्मापि ब्रह्म अयमात्मा चतुष्पात् । अस्य प्रथमपाद: वैश्वानर:, य: जाग्रदवस्थायां जडपदार्थान् अभ्युपगच्छति। द्वितीयस्तु पाद: तैजस:, य: स्वप्नावस्थायां सूक्ष्मविषयान्, तृतीयस्तु पाद: प्राज्ञ:, य: सुषुप्त्यवस्थायां आनन्दोपभोगम् एवं तुरीयं पाद: आत्मानामक एक: अद्वितीय: 'आकार:' इति कथ्यते। इमां सूत्रशैलीम् अनुसृत्य पश्चात् दर्शनकल्पधर्मगृह्यशुल्बसूत्राणि प्रतिपादितानि।

**अल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखम् ।**

**अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥**

अदृश्यमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं पञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यते स आत्मा स विज्ञेयः' इति

नान्तः प्रज्ञं न बहिःप्रज्ञं नोभयतः प्रज्ञं न प्रज्ञानधनं न प्रज्ञं नाज्ञम्। अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः ।

ओम् इत्यस्य चतुर्थः पादः क्रमप्राप्तो वक्तव्य इत्याह नान्तः प्रज्ञमित्यादिना। सर्वशब्दप्रवृत्तिनिमित्तशून्यत्वात्तस्य शब्दानभिधेयत्वमिति विशेषप्रतिषेधेनैव च तुरीयं निर्दिदिक्षति। शून्यमेव तर्हि तत्, न। मिथ्याविकल्पस्य निर्निमित्तत्वानुपपत्तेः। न हि रजतसर्पपुरुषमृगतृष्णिकादिविकल्पाः शुक्तिकारज्जुस्थाणूषरादिव्यतिरेकेणावस्त्वास्पदाः शक्याः कल्पयितुम्।

एवं तर्हि प्राणादिसर्वविकल्पास्पदत्वात्तुरीयस्य शब्दवाच्यत्वमिति न प्रतिषेधैः प्रत्याय्यत्वमुदकाद्याधारादेरिव घटादेः । न, प्राणादिविकल्पस्यासत्त्वाच्छुक्तिकादिष्विव रजतादेः। न हि सदसेताः सम्बन्धः शब्दप्रवृत्तिनिमित्तभागवस्तुत्वात्। नापि प्रमाणान्तरविषयत्वं स्वरूपेण गवादिवत्, आत्मनो निरुपाधिकत्वात्। गवादिवन्नापि जातिमत्तम् अद्वितीयत्वेन सामान्यविशेषाभावात्। नापि क्रियावत्त्वं पाचकादिवदविक्रियत्वात्। नापि गुणवत्त्वं, नीलादिवनिर्गुणत्वात्। अतो नाभिधानेन निर्देशमर्हति। शशविषाणादिसमत्वानिरर्थकत्वं तर्हि। न आत्मत्वावगमे तुरीयस्यानात्मतृष्णाव्यावृत्तिहेतुत्वाच्छुक्तिकावगम इव रजततृष्णायाः। न हि तुरीयस्याऽऽत्मत्वावगमे सत्यविद्यातृष्णादिदोषाणां सम्भवोऽस्ति। न च तुरीयस्याऽऽत्मत्वानवगमे कारणमस्ति। सर्वोपनिषदां तादर्थ्यणोपक्षयात्। "तत्त्वमसि'' "अयमात्मा ब्रह्म' "तत्सत्यम् स आत्मा" "सत्याक्षादपरोक्षाद्ब्रह्म' "स बाह्याभ्यन्तरो ह्यजः'' "आत्मैवेदं सर्वम्' इत्यादीनाम्।

सोऽयमात्मा परमार्थापरमार्थरूपश्चतुष्पादित्युक्तस्तस्यापरमार्थरूपमविद्याकृतं रज्जुसदिसममुक्तं पादत्रयलक्षणं बीजाङ्कुरस्थानीयम्। अथेदानीमबीजात्मकं परमार्थस्वरूपं रज्जुस्थानीयं सर्पादिस्थानीयोक्तस्थानत्रयनिराकरणेनाऽऽह- नान्तःप्रज्ञमित्यादि। नन्वात्मनश्चतुष्पात्त्वं प्रतिज्ञाय पादत्रयकथनेनैव चतुर्थस्यान्तः प्रज्ञादिभ्योऽन्यत्वे सिद्धे नान्तः प्रज्ञमित्यादिप्रतिषेधोऽनर्थकः। न। सर्पादिविकल्पप्रतिषेधेनैव रज्जुस्वरूपप्रतिपत्तिवत्त्र्यवस्थस्यै वाऽऽत्मनस्तुरीयत्वेन प्रतिपिपादयिषितत्वात्। तत्त्वमसीतिवत्।

यदि हि व्यवस्थात्मविलक्षणं तुरीयमन्यत्तत्प्रतिपत्तिद्वाराभावाच्छास्त्रोपदेशानर्थक्यं शून्यतापत्तिर्वा ।

रज्जुरिव सर्पादिभिर्विकल्प्यमाना स्थानत्रयेऽप्यात्मैक एवान्तःप्रज्ञादित्वेन विकल्प्यते यदा, तदाऽन्तः प्रज्ञादित्वप्रतिषेधविज्ञानप्रमाणसमकालमेवाऽऽत्मन्यनर्थ-प्रपञ्चनिवृत्तिलक्षणफलं परिसमाप्तमिति तुरीयाधिगमे प्रमाणान्तरं साधनानन्तरं वा न मृग्यम् । रज्जुसर्पविवेकसमकाल इव रज्ज्वां सर्पनिवृत्तिफले सति रज्ज्वधिगमस्य । येषां पुनस्तमोपनयव्यतिरेकेण घटाधिगमे प्रमाणं व्याप्रियते तेषां छेद्यावयवसम्बन्ध-वियोगे व्यतिरेकेणान्यतरावयवेऽपि प्रवृत्तं प्रमाणमनुपादित्सितमोनिवृत्तिफलावसानं छिदिरिव-च्छेद्यावयवसम्बन्धविवेककरणे प्रवृत्तं तदवयवद्वैधीभावफलावसाना, तदा नान्तरीयकं घटविज्ञान न तत्प्रमाणफलम्। न च तद्वदत्यात्मन्यध्यारोपितान्तःप्रज्ञात्वादिविवेककरणे प्रवृत्तस्य प्रितिषेधविज्ञानप्रमाणस्यानुपादित्सितान्तःप्रज्ञत्वादिनिवृत्तिव्यतिरेकेण तुरीये व्यापारोपपत्तिः। अन्तःप्रज्ञत्वादिनिवृत्तिसमकालमेव प्रमावृत्वादिभेदनिवृत्तेः। तथा च वक्ष्यति- "ज्ञाते द्वैतं न विद्यते'' इति। ज्ञानस्य द्वैतनिवृत्तिक्षणव्यतिरेकेण क्षणान्तरानवस्थानात्। अवस्थाने चानवस्थाप्रसङ्गाद् द्वैतानिवृत्तिः। तस्मात्प्रतिषेधविज्ञानप्रमाणव्यापारसमकालैवाऽऽत्मन्यध्यारोपितान्तःप्रज्ञत्वाद्यनर्थ-निवृत्तिरिति सिद्धम्। नान्तः प्रज्ञमिति तैजसप्रतिषेधः। न बहिःप्रज्ञमिति विश्वप्रतिषेधः। नोभयतः प्रज्ञमिति

जाग्रत्स्वप्नयोरन्तरालावस्थाप्रतिषेधः। न प्रज्ञानघनमिति सुषुप्तावस्थाप्रतिषेधः। बीजाभावाविवेकरूपत्वात्। न प्रज्ञमिति युगपत्सर्वविषयप्रज्ञातृत्वप्रतिषेधः। बीजभावाविवेकरूपत्वात्। न प्रज्ञमिति युगपत्सर्वविषयप्रज्ञातृत्वप्रतिषेधः । नाप्रज्ञमित्यचैतन्यप्रतिषेधः।

कथं पुनरन्तः प्रज्ञत्वादीनामात्मनि गम्यमानानां रज्वादौ सर्पादिवत्प्रतिषेधादसत्त्वं गम्यत इति। उच्यते। ज्ञस्वरूपाविशेषेऽपीतरेतरव्यभिचाराद्रज्वादाविव सर्पधारादिविकल्पितभेदवत्सर्वत्राव्यभिचाराज्ज्ञस्वरूपस्य सत्यत्वम्। सुषुप्ते व्यभिचरतीति चेन्न। सुषुप्तस्यानुभूयमानत्वात्। "न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते' इति श्रुतेः। अत एवादृष्टम्। यस्माददृष्टं तस्मादव्यवहार्यम्। अग्राह्यं कर्मेन्द्रियैः। अलक्षणमलिङ्गमित्येतदननुमेयमित्यर्थः। अत एवाचिन्त्यम्। अत एवाव्यपदेश्यं शब्दैः। एकात्मप्रत्ययसारं जाग्रदादिस्थानेष्वेकोऽयमात्मेत्यव्यभिचारी यः प्रत्ययस्तेनानुसरणीयम्। अथवैक आत्मप्रत्ययः सारं प्रमाणं यस्य तुरीयस्याधिगमे, तत्तुरीयमेकात्मप्रत्ययसारम् । "आत्मेत्येवोपासीत' इति श्रुतेः । अन्तःप्रज्ञत्वादिस्थानि- निषेधः कृतः। प्रपञ्चोपशममिति जाग्रदादिस्थानधर्माभाव उच्यते। अत एव शान्तं, शिवं, यतोऽद्वैतं भेदविकल्परहितं चतुर्थं तुरीयं मन्यन्ते। प्रतीयमानपादत्रयरूपवैलक्षण्यात्। स आत्मा स विज्ञेय इति, प्रतीयमानसर्पभूछिद्रदण्डादिव्यतिरिक्ता यथा रज्जुस्तथा तत्त्वमसीत्यादिवाक्यार्थ आत्मा। "अदृष्टो द्रष्टा" "न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते" इत्यादिभिरुक्तो यः, स विज्ञेय इति भूतपूर्वगत्या ज्ञातरि द्वैताभावः।7॥.

**कथापद्धतिः अथवा आख्यायिकापद्धतिः** (Mythical Method)- उपनिषद्वाङ्मये बहुत्र कथापद्धतिरपि प्रयुक्ता दृश्यते। विषयकाठिन्यस्थलेषु जामिता दूरीकर्तुं कथाः अतीवयोग्याः भवन्ति। कथामाध्यमेन कठिनोऽपि विषयः सरलो भवति इति पद्धतिरियं निरूपयति। कथाश्रवणे शिष्याः उत्साहं प्रदर्शयन्ति। केनोपनिषदि यत्रोपाख्यानद्वारा अहङ्कारः ब्रह्मज्ञानस्य अवरोधकः भवति, तस्य नाशं ब्रह्मज्ञानं साधयतीति उपदिशति महर्षिः।

केनोपनिषदि उमायाः हैमवत्याः इन्द्रस्य आख्यायिका अत्रोदाहरणम्। यथा इन्द्रियाणां सर्वेषामहमेव ज्येष्ठः श्रेष्ठश्च इति विवदमानानां ब्रह्म प्रति गमनमाख्यातं छान्दोग्ये काठके नचिकेतोपाख्यानं तु विद्यास्तुत्यर्थम् ।

**अथ ह प्राणा अहँश्रेयसि व्यूदिरेऽहगँ श्रेयानस्मयहम् श्रेयानस्मीति॥6॥**

**तेह प्राणाः प्रजापतिं पितरमेत्योचभगवन्को नः श्रेष्ठ इति तान्होवाच।**

**यस्मिन्व उत्क्रान्ते शरीरं पापिष्ठतरमिव दृश्यते स वः श्रेष्ठ इति ॥7॥**

**साहवागच्चक्राममा सम्वत्सरं प्रोष्य पर्येत्यवाच कथमशकतर्ते मजीवितुमिति**

**यथा अकला।**

**अवदन्तः प्राणन्तः प्राणेन पश्यन्तश्चक्षुषा श्रृण्वन्तः श्रोत्रेण ध्यायन्तो मनसैवमिति प्रविवेश ह वाक् ॥8॥**

**चक्षुर्योच्चक्राम तत्सम्वत्परं प्रोष्य पर्येत्योवाच कथमशकतर्ते मज्जीवितुमिति यथाऽन्धा अपश्यतः।**

**प्राणन्तः प्राणेन वदन्तो वाचा श्रृण्वन्तः श्रोत्रेण ध्यायन्तो मनसैवमिति प्रविवेश हचक्षु ॥9॥**

**क्षोत्रगँ होच्चक्राम तत्सम्वत्सरं प्रोष्य पर्येत्योवाच कथमशकतर्ते मजीवितुमति यथा बधिरा**

**अश्रुण्वन्तः प्राणन्तः प्राणेन वदन्तो वाचा पश्यान्तश्चक्षुषा ध्यानयन्तो मनसैवमिति प्रविवेश ह श्रोत्रम् ॥10॥**

**मनो होच्चक्राम तत्सम्वत्सरं प्रोष्य पर्येत्योवाच कथमशकतर्ते मज्जीवितुमिति यथा बाला अम -**

**नसः प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा श्रृण्वन्तः श्रोत्रेणैवमिति प्रविवेश हमनः॥11॥**

**अथ ह प्राण उच्चिक्रमिषन्स यथा सुहयः पड्वीशशङ्कून्सडिदेदेवमितरान्**

**प्राणान्समखिदत्तू हाभिसमे त्योचुर्भगवन्नेधि त्वं नः श्रेष्ठोऽसि मोत्क्रमीरिति॥12॥**

**अथ हैनं वागुवाच यदहं वसिष्ठोऽस्मि त्वं तद्वसिष्ठोऽसीत्यथ हैनं चक्षुरुवाच यदहं प्रतिष्ठाऽस्मि त्वं तत्प्रतिष्ठाऽसीति॥1३॥**

**अथ है श्रोत्रमुवाच यदहँ सम्पदस्मि त्वं तत्सम्पसरीत्यथ हैनं मन उवाच यदहमायतनमस्मि त्वं तदायतनमसीति॥14॥**

**न वै वाचो न चक्षूँषि न श्रोत्राणि न मनांसीत्याचक्षते प्राणा इत्येवाऽऽचक्षते प्राणो ह्येवैतानि सर्वाणि भवति॥15॥**

**अथ ह प्राणा अहंश्रेयस्यहं श्रेयानसम्यहं श्रेयानस्मीत्येतस्मिन्प्रयोजने व्यूदिरे नाना विरुद्धं चोदिर उक्तवन्तः॥16॥**

**विवरणम्**

तेह – ते हैवं विवदमाना आत्मनः श्रेष्ठत्वविज्ञानाय प्रजापतिं पितरंजनयितारं कश्चिदेत्योचुरुक्तवन्तो हे भगवन्को नोऽस्माकं मध्ये श्रेष्ठोऽभ्यधिको गुणैरित्येवं पृष्टवन्तः । तान्पितोवाच ह यस्मिन्वो युष्माकं मध्ये उत्क्रान्ते शरीरमिदं पापिष्ठमिवातिशयेन जीवतोऽपि, समुत्क्रान्तप्राणं ततोऽपि पापिष्ठतरमिवातिशयेन दृश्यते कुणपमस्पृश्यमशुचि दृश्यते स वो युष्माकं श्रेष्ठ इत्यवोचत्काक्वा तदुःखं परिजिहीर्षुः॥7॥

एवं रीत्या उपनिषत्संवर्णितविधयः नवीनशिक्षाशास्त्रज्ञानां मार्गदर्शकाः भवितुमर्हन्ति।

**उपयुक्तग्रन्थसूची –**


1. डॉ. वेदान्त विष्णुभट्टाचार्युलु (2004), उपनिषद्दीपिकलु (तेलुगु), ति.ति.दे., तिरुपतिः।
2. रायप्रोलु लिंगनसोमयाजि (2001), उपनिषच्चन्द्रिक (तेलुगु), ति.ति.दे., तिरुपतिः।
3. कोत्तपल्लि हनुमन्तराव् (2001), नित्यजीवितंलो वेदमुल उपयोगमुलु, ऋषि पब्लिकेशन्स्, विजयवाडा।
4. डॉ. च.ल.ना.शर्मा, डॉ. फतेहसिंह (1996), संस्कृतशिक्षणम्- नवीनप्रविधियश्च (Teaching Sanskrit with new Techniques), आदित्यप्रकाशनम्, जयपुरम्।
5. श्रीरामखेलावन चौधरी (1961), शिक्षण-विधियों की रूपरेखा, हिन्दी साहित्य भण्डार, लखनऊ।
6. डॉ. वि. मुरलीधरशर्मा (2003), संस्कृतशिक्षणसमस्याः, तिरुपतिः, राष्ट्रियसंस्कृतविद्यापीठम्।
7. नरेन्द्रः (1997), शिक्षस्व संस्कृतम् प्राकृतिकः पन्थाः, पाण्डिच्चेरी-संस्कृतकार्यालयः।
8. श्रीनिवासाचारि. के. (2001), त्रिंशद्दिनेषु संस्कृतम्, चैन्नै, बालाजिपब्लिकेशन्स्।